श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - १९

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - १९

*प्राचेतसकथानुवर्णनम्*

पृथोस्तु नप्ता पृथुधर्मकर्मठः
 प्राचीनबर्हिर्युवतौ शतद्रुतौ।
प्रचेतसो नाम सुचेतसस्सुता-
 नजीजनत् त्वत्करुणाङ्कुरानिव॥ १॥

पितुः सिसृक्षानिरतस्य शासनात्
 भवत्तपस्याभिरता दशापि ते।
पयोनिधिं पश्चिममेत्य तत्तटे
 सरोवरं सन्ददृशुर्मनोहरम्॥ २॥

तदा भवत्तीर्थमिदं समागतो
 भवो भवत्सेवकदर्शनादृतः।
प्रकाशमासाद्य पुरः प्रचेतसाम्
 उपादिशत् भक्ततमस्तवस्तवम्॥ ३॥

स्तवं जपन्तस्तममी जलान्तरे
 भवन्तमासेविषतायुतं समाः।
भवत्सुखास्वादरसादमीष्वियान्
 बभूव कालो ध्रुववन्न शीघ्रता॥ ४॥

तपोभिरेषामतिमात्रवर्धिभिः
 स यज्ञहिंसानिरतोऽपि पावितः।
पिताऽपि तेषां गृहयातनारद-
 प्रदर्शितात्मा भवदात्मतां ययौ॥ ५॥

www.prapatti.com

कृपाबलेनैव पुरः प्रचेतसां
    प्रकाशमागाः पतगेन्द्रवाहनः।
विराजि चक्रादिवरायुधांशुभिः
    भुजाभिरष्टाभिरुदञ्चितद्युतिः॥ ६ ॥

प्रचेतसां तावदयाचतामपि
    त्वमेव कारुण्यभराद्वरानदाः।
भवद्विचिन्ताऽपि शिवाय देहिनां
    भवत्वसौ रुद्रनुतिश्च कामदा॥ ७ ॥

अवाप्य कान्तां तनयां महीरुहां
    तया रमध्वं दशलक्षवत्सरीम्।
सुतोऽस्तु दक्षो ननु तत्क्षणाच्च मां
    प्रयास्यथेति न्यगदो मुदैव तान्॥ ८ ॥

ततश्च ते भूतलरोधिनस्तरून्
    क्रुधा दहन्तो द्रुहिणेन वारिताः।
द्रुमैश्च दत्तां तनयामवाप्य तां
    त्वदुक्तकालं सुखिनोऽभिरेमिरे॥ ९ ॥

अवाप्य दक्षं च सुतं कृताध्वराः
    प्रचेतसो नारदलब्धया धिया।
अवापुरानन्दपदं तथाविध-
    स्त्वमीश वातालयनाथ पाहि माम्॥ १० ॥

**********



www.prapatti.com